Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४६८

Title पञ्चमी स्तवराज:

Author x

Extent ११ Age x

Subject पुराण माहात्म्यादि

✓

© Dharmartha Trust J&K. Digitized by eGangotri

पंचमी स्तवराजः त्रिपुरसुन्दरी स्तवराजो वा

४४७८

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिपुरसुंदरी स्तोत्र

© Dharmartha Trust J&K. Digitized by eGangotri

स्तवराज श्रीसांबशिवायनमः नमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणम्। शिरसायोगपीठस्थंमुक्तिकामार्थसिद्धये १ या
१ नित्यापरमाशक्तिर्जगत्रैतन्यकारिणी। तांनमामिमहादेवींपंचमींप्रणमाम्यहम् २ अथःकल्पतरोर्मूलेभवान्या र
त्नमंदिरे। रत्नसिंहासनेदेव्याःश्रीचक्रंप्रणमाम्यहम् ३ अग्निर्मेपातुमांनित्यंपातुनित्यंवरुणःधरा। भूमिश्चपातुमां
नित्यंपातुमांचंद्रतारकाः ४ वसवःपातुमांनित्यंरुद्रस्तुपातुमांसदा। द्वादशादित्यतःपातुमा मरुतःपांतुमां
सदा ५ विश्वेदेवाःसदापांतुपातुमांचित्तयंगुरुः। भगवान्शंसदापातुब्रह्मणःपातुवामनः ६ ऋद्धिःश्रुताश्च
मेप्रपंविष्णुःपातुमहादेवहि। शिवश्चसर्वतःपातुसिद्धिश्चगणनायकः ७ दिग्पालएकादशाःपांतपृथ्वीचैवतुदे
वता। अस्कस्थितादेवताश्वरक्षांकुर्वंतुसर्वदा ८ त्रिभुवंमेसदापातुपातुमांगुरुमंत्रवित्। ऋषिदेवतछंदां राम
सिपातुमांकुलदेवता ९ अविघ्नंकुरुमेदेविपातुमांचंडिकेश्वरी। एताभिःसहितापातुपूजकानांहिना १

© Dharmartha Trust J&K. Digitized by eGangotri

पवै १० इंद्रोमांरक्षेत्पूर्वेआग्नेय्यामग्निदेवता।याम्यांयमःसदापातुनैर्ऋत्यांनिर्ऋतिस्तथा ११ पश्चिमेवरुणः
पातुवायव्येवायुर्देवता।धनदश्चोत्तरेपातुईशान्यामीश्वरोविभुः १२ ऊर्ध्वंप्रजापतिःपातुअधश्चानंतदेवता।ए
वंदशदिशोरक्षांकुर्वंतुदेवतागणाः १३ गणेशःसर्वदापातुक्षेत्रेशोरक्षेत्सदा।द्वारश्रीःसर्वदापातुदेहलीरक्षे
त्सदा १४ गणनाथःसदापातुदुर्गीमांपरिरक्षतु।वटुकोभैरवश्चांतेक्षेत्रपालोपिरक्षतु १५ सदात्यासप
त्नीचकामदेवश्चसर्वदा।शीत्यासहवसंतोपिपातुमांनेनेवने १६ श्रीचक्रपश्चिमद्वारेभवान्यालमंदिरे।सरस्वती
महालक्ष्मीर्मांपातुदुर्गाविभूतये १७ भद्रकालीचचामुंडीब्राह्मीह्माचैवशुभंकरी।गौरीचलोकधात्रीचवागीश्वपी
द्योमम १८ एताश्चक्रेस्थितास्सर्वारक्षांकुर्वंतुसर्वदा।पाखंडकाशिलाभूताभूमौयेवांतरिक्षगाः १९ दि
विलोकेस्थितायेतेविनश्यंतुशिवाज्ञया।शिवंकुर्वंतुताःसर्वाःस्वासनेपंचदेवताः २० वक्ष्नामसिद्धिसोत्रस्ता

© Dharmartha Trust J&K. Digitized by eGangotri

छायां कृत्वा सर्वदा वक्रस्य दक्षिणे भागे श्रामत्पात्रस्य मंडले २१ पंचरत्नं महापात्रं षडंगानि सिद्धये मंडलं वाम
तः कृत्वा जीवेन चतुरस्रकम् २२ त्रिकोणं वाथ षट्कोणं वृत्ताकारं विशेषतः वह्न्यर्कराभ्यां देवेशि तत्राधा
रं प्रतिष्ठितम् २३ आधारं त्रिपदं चैव षट्पदं वा चतुष्पदम् । अथवा वर्तुलं कुर्याद्रमणीयं मनोहरम् २४ श
खमध्ये भोगपूजा बलिपात्राणि कल्पयेत् २५ स्वर्णादिरचितां पृथ्वीं अर्पितां पूजयेच्छिवे । वह्निमंडलरूपं तु क
लादशकमर्चयेत् २६ वह्नेः स्फुमंडलं पात्रं कुलदेव्याश्च पूजने । धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिं
गिनी २७ सुश्रीः सुरूपा कपिला हव्यकव्यवहा तथा । पात्राधारे त्रिकोणे वै वैश्वानरकला दश २८ यकारा
दिक्कारांतं सृष्टिकृवीलान्यजकलोन्यायेभिः कलाभिः सलिलं वाह्निसूत्रं प्रपूजयेत् २९ एताभिः सहिते
रक्ताकुर्याद्वैश्वानरो मम मा कलशं हेममयं कृत्वा स्थापयेत्तत्र सुंदरि ३० सूर्यस्य मंडलं पात्रं मम सर्वार्थसिद्ध

© Dharmartha Trust J&K. Digitized by eGangotri

पातपिनीतापिनीधूम्रामरीचिर्ज्वालिनीरुचिः ३१ सुषुम्नाभोगदाविश्वाबोधिनीधारिणीक्षमाककारादिभाका
रांतंतथासूर्यकलास्यजत् ३२ येभिःकलाभिःसूर्यश्चस्वरूपंमंडलसंस्थितःषट्कोणेपात्रपृष्ठेतुद्वादशार्ककलाःन्य
सेत् ३३ येताभिःसहितोरश्मिमादित्यःकुर्वतांममासविन्दुर्मंडलेयत्रसोमस्यामृतमण्डलम् ३४ प्रथमंसर्वविद्याप
त्तुभैरवानंदहेतवे।कलशांतःसमोसूर्यविशेषेणवरानने ३५ तत्रस्थममृतंसाक्षाद्ब्रह्मरूपंविभावयेत्।चंद्रमंडलम
भ्यर्च्यकलाभिःक्षरसंहरी ३६ षट्कोणमध्येत्रदेविवन्हुकोणंवतोपरि।स्वरैश्चषोडशैर्युक्तैश्चंद्रिकाभिःकानांन्य
सेत् ३७ अमृतंतत्रसंस्थाप्यह्रितीपतत्रसूलयत्।अमृतामानदापूषातुष्टिःपुष्टीरतिर्धृतिः॥ ३८ शशिनीचं
द्रिकाकांतिर्ज्योत्स्नाश्रीप्रीतिचंद्रिका।पूर्णासुधासंपूर्णमंडले ४० नक्षत्राधिपतीरक्षाकरात्तुममभूतये।त
ततःसमर्च्यमंत्रैस्तुजपेदानंदभैरवम् ४१ क्षुधादेव्यांततोवर्षन्मात्कांनवसंख्यया।स्मृतिःस्मृतिर्धृतिर्मेधा।

© Dharmartha Trust J&K. Digitized by eGangotri

दशाङ्ग ३ कांतिर्लक्ष्मीर्धृतिः स्थिरा। स्थितिः सिद्धिर्जराश्चैव कांता रिक्तातिरेव वा। ऐश्वर्या रतिकाम्या च वरदा ह्लादिनी तथा। प्री
ति दीर्घावती ह्याचैतद्बीच भयते ह्रिता। निद्रा रक्तक्रोधिनी वाथ क्षिपा कमला शिनी तथा ४४ मृत्युः श्वेता वपी
ता च वरुणा अमिता तथा। अंतेति वकलाः प्रोक्ता मातृकाः पान्तु सर्वदा ४५ निवृत्तिश्च प्रतिष्ठा च विद्या शां
तेतिरिंधिता। दीप्तिरेव विनिमोचिन्यो सूक्ष्मा येति स्फुरणप्रदा ४६ ज्ञानामृतेति व्यापिन्या देव्या इत्येति व्योम
दा। व्योमरूपकलाएताः स्पर्शजाः पान्तु सर्वदा ४७ अमृतदीपिते विद्यास्तु कशापाद्विमोचयेत्। हंसस्तु थि
ससतत द्विसोन्त द्विसोस्फुरत्रिपवकम्॥ ४८ स्वादिष्टैश्च मदिष्टैश्च दिव्यामृतवर्षिणाम्। अनेन विधिनाक्ष
लाकुलदेव्यां समर्चयेत् ४९ विद्यापपूर्वभागे तु वर्तुलं त्र्यस्रं वंमंडलम्। पंचत्रिकांतत्र संस्थाप्य प्राशेषं तत्रैव विनि राम
क्षिपेत् ५० सुद्धोदकेन गंधाद्यैरर्चयेन्मूलविद्यया। पश्चाद्देवं प्रतिष्ठाप्य पूर्णेन्दुं हंसमन्त्रितम् ५१ षडंगं ३

© Dharmartha Trust J&K. Digitized by eGangotri

तत्रांसं मूलपञ्चनामानं न्यासार्घ्यस्य पूजयेत् । न्यासमर्पयेत् देवेशि नमपाचामारक्तणाम् ५२ शिरोललाटभ्रूमध्ये
कंठे हृन्नाभिगुह्यके । आधारे भ्रूहके चैव न्यासमष्टांगमाचरेत् ५३ कर्णयोः स्कन्धुके देशे शंखयोश्चिबुदशो
र्नेत्रयो । अंसद्वये च हृदये न्यसेत्कूर्परकुक्षिषु ५४ लावधुःपादयोर्गुह्ये पार्श्वयोर्हृदयांगुले ॥ स्तनद्वये कंठदेशे नव
योनिं न्यसेत्क्रमात् ५५ मूर्ध्नि गुह्ये च हृदये नेत्रत्रिपएव वा । श्रोत्रयोर्युगले देवि चिबुके च भुजयोः पुनः ५६ पृष्ठेला
न्यासं श्वनामायालयसेत्पंचदशाक्षरीम् । अथ देवि महेशानि द्विशोधार्घ्यस्य लक्षणम् ५७ आत्माश्रीचक्रयोर्म
ध्ये वर्तुरश्रं तु मंडलम् ॥ त्रिवेधकलापूर्णोक्षधासंपूर्णमंडले ५८ नक्षत्राधिपती रक्तां करोतु मम सर्वदा । आनंद
भैरवो रक्तां करोतु मम [illegible] मसिद्धये ५९ तत्र पूर्णामृते पूर्णे शक्तिर्पावाहणी वला । आनन्दरूपिणी रक्तां करो
तु मम सर्वदा ६० सर्वदा मंडकाधारे रुद्रः कालानलो विभुः । रक्तां करोतु मे नित्यं यामूला प्रकृतिः सदा ६१ कृ

© Dharmartha Trust J&K. Digitized by eGangotri

स्तवरा·
४

र्मस्यमस्तकं पातु अनन्तो रूपेण सदा । तस्य मूर्द्धि स्थिते वज्रे कमठः परिरक्षतु ६२ दंते तस्य स्थिता पृथ्वी पातु नित्यं
वसुंधरा समुद्रः सर्वदा पातु सप्तरत्नैः स्मृतोज्वलैः ६३ रत्नद्वीपस्तु मे रक्षां करोतु स्वर्णपर्वतः । रत्नभूमिरियं पातु मा
त्यं पातु महीतले मम् ६४ करोतु कुलस्य रक्षां कामरूपं कवासिनम् । पातु मां नंदनोद्यानं रक्षतां कल्पपादपाः
६५ अथ स्तंभाः सदा पातु विचित्रानंदभूमिषु । श्री रत्नमंदिरं दिव्यं ज्योतिर्मणिविभूषितम् ६६ तन्मां पातु महा
देवी प्रभापटलवर्तिका ॥ श्वेतछत्रं सदा पातु रत्नस्तंभा मणिमयम् ६७ प्रभामध्यगतं पातु रत्नसिंहासनं सदा
। सिंहासनस्य पार्श्वस्थं धर्मज्ञानं तु रक्षतु । वैराग्यरूपे नित्यमैश्वर्यरूपे सदा । अधर्मरूपे नित्यमज्ञानप
रिरक्षतु ६९ अवैराग्यं तु मां पात्वनैश्वर्यरूपं सदा । सिंहासनस्य मध्यस्थं पद्मं मां परिरक्षतु ७० स्कंधो मां पा राम
तु वक्त्रं वपद्मनालं च सर्वदा । ऊर्ध्वं चाधः सदा पातु तत्स्वरूपा च कर्णिका ७१ सूर्यस्य मंडलं पातु सोमस्यापातु ४

© Dharmartha Trust J&K. Digitized by eGangotri

मंडलम्। वह्नेरूपं मंडलं पातु पावसं त्वं च मां सदा ७२ रजोरूपा तु मां नित्यं पातु नित्यं तमोगुणः। ज्ञानं माया
कलाविद्यां तत्त्वज्ञानं विभूतये ७३ रत्नसिंहासने देव्याः श्रीचक्रं रूपे सदा। हाटकोत्कलमाणिक्यपद्मरागड्ड
मालयम् ७४ वज्रादिकरचितभाना मौक्तिकशोभितम्। सवद्रह्मासनं भद्रं पंचवक्त्रस्य पूजनम् ७५ सृष्टिस्थि
ति च रूपं च सद्योजातात्मक पश्चिमे। पालयंति सदा भद्रं वामदेवाय सौम्यदिक् ७६ अघोरः सर्वसंहारं कुरु वाम्या
सनं स्रुभमम्। ऐं ह्रां ह्रीं शिं त्र तत्पुरुष ईशान्या मद्ध्वक्त्रकः ७७ नित्यं सिंहासनं भद्रं पंचश्वेतसदाशिवम्। पंचश्वेता
सनं साक्षान्मोक्षदायिनं संशयः। निष्कलं निर्विकल्पं धां देवपूर्वं निर्विकल्पं धांतथा ७८ अघोरा मातृका विद्यावागु
नाशांतिरेव वाकोम नित्यां च शांतिः स्याद् षट्त्रिंशत्कलादिकम् ७९ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदा
शिवः। एते पंच महाप्रचारः क्रां कुर्वंतु सर्वदा ८० सुधार्णवासनं पातु पातु घोरां तु जासनम्। दिव्यासनं सदा पातु ब्रह्मा

© Dharmartha Trust J&K. Digitized by eGangotri

स्त॰वा॰ तुचक्रासनं सदा २१ सर्वसंज्ञासनं पातु साध्यसिद्धासनं तथा। महाशुवासनं पातु शक्तिपर्य्यंकमासनम् २२ पंच
५ वक्त्रमहश्शितं द पातु पद्मासनं तथा। तत्रैव संस्थिता देव्यो रक्षां कुर्वंतु सर्वदा २३ ईश्वरी सुंदरी चैव वशिनी श्रीश्म
लिनी। सिद्धैस्सवदियासवी त्रिपुरघाश्च पातु माम्। २४ बिंदुत्रिकोणवसुकोणदशारयुग्ममन्वश्रनागदलसंयुत
5 षोडशारम्। वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेतदुदितं परदेवतायाः २५ पंचवक्त्रश्चतुर्वक्त्रि ह्रिपद्मास्त्रि महात
। महाचक्रे सावर्णश्रुजासागेन वार्णिवी २६ भूगृहं स्वरपत्राब्जं त्रिवृत्तं षोडशारकम्। अष्टारेव भवेद्देवि मन्वश्रं द्वि
दशारकम् २७ अथ वीत्रकोणं च मध्ये वेदसंयुतम्। विंदवान्ते विलोमेन त्रपारं स्थिरमेतथा २८ अष्टारं वेल
लां देव भ्रूमध्ये त्रिदशारकम्। द्विदशारं तथा कंठे वंतु दशरवक्तृमि २९ अष्टारं च भवेन्नाभौ आधारे षोडशारक राम
म्। वाह्यचक्रे त्वलुष्या दो पादयोः पादसंकुशम् ३० नालिकांचैव श्रोणी दिर्घ वचाणधनुर्द्धा दिव्याघः पा ५

© Dharmartha Trust J&K. Digitized by eGangotri

त्तुमां नित्यं सिद्धौघो रक्षुपेत्सदा ९१ मानौघश्च सदा पातु त्रिभिरोघं नमाम्यहम्। दिव्यौघं च सदा सिद्धमानौघं च त
थाक्रमम् ९२ स्तुतिं ध्राबाणां सव्यो रक्षां कुर्वन्तु सर्वदा। आत्मविद्याशिवं तत्त्वं त्रितत्त्वरूपमव्ययम् ९३ येताभिः सहिता
रक्षां चक्रस्था योगिनीगणाः। कुर्वन्तु वरदाश्चैव वक्षश्च मन्त्रमुलत्रयम् ९४ त्रैलोक्यमोहनं चक्रं सर्वाशापूरकं परम्। सर्व
संक्षोभणं चक्रं सर्वसौभाग्यदायकम् ९५ सर्वार्थसाधकं पितं सर्वरक्षाकरं वरम्। सर्वरोगहरं चक्रं सर्वसिद्धिप्र
दायकम् ९६ सर्वानन्दमयं चक्रं लवमं वज्ञानायकम्। नवधा चक्रसंकेतं यो जानाति स पूजकः ९७ त्रिपुरा त्रि
पुरेशी च सुन्दरी त्रिपुरा शिवा। त्रिपुराश्री त्रिपुरमाली च सिद्धा सं त्रिपुराम्बिका ९८ महात्रिपुरसुन्दर्यः परमात्मा च
शाक्ताः। समस्तप्रकटा गुप्ता गुप्ता गुप्ततराश्च याः ९९ सम्प्रदायकुलाकौलीनिगर्भरहस्यकाः। परापररहस्या
च योगिन्यश्चक्रसंस्थिताः १०० येताभिः सहिता रक्षां कुर्वन्तु योगिनीगणाः। अत्तिनापश्चिमे पातु लघिमा वो

© Dharmartha Trust J&K. Digitized by eGangotri

रेतथा १०१ पूर्वद्वारेतुमहिमाईशित्वापातुदक्षिणे।वशित्वापातुमहतेशाकाम्यापातुईशके १०२ मुक्तिसि
स्तथाग्नेय्यांसिद्धासिद्धिस्तुनैरृते।अथःपातुसदाशान्तिःसर्वकामप्रदायिनी १०३ रससिद्धिःसदापातुऊर्ध्वे
ष्ठनिवासिनिवासिनी।भैरवस्त्वसितांगाख्यःकामरूपाख्यपीठकं १०४ ब्रह्माणीसहितःपूर्वेदाम्मांपा[illegible]
चाग्निदिग्भागेसंस्थितोरुरुभैरवः।माहेशीसहितःपातुकलानाशस्यसिद्धये १०५ वैष्णवीसहितःक्रोधःकुलां
ठरोजके।नैरृत्यांसर्वदापातुभोगकामार्थसिद्धये १०६ हारेपश्चिमेपातुवाराहीसहितोममाउन्मत्तभैरवोनित्य
करोतुममसंगलम् १०७ लालंधरेमहापीठेचामुण्डासहितःसदा।भीषणोभैरवःपातुसाधकानांचसिद्धये १०८
संहारश्चंडिकासार्द्धंदेविकोलस्यपीठके।ऐशान्येसर्वदापातुकुलाम्नायस्यसिद्धये १०९ सर्वेसंक्षोभिणीमुद्रा
पश्चिमेपातुसर्वदा।द्राविणीचोत्तरेपातुपूर्वेचाकर्षिणीतथा ११० पाश्वेवश्यासदापातुउन्मादामातृकातथा

ईशो महांकुशा पातु निर्ऋतौ पातु वानले ॥११॥ नैर्ऋत्यां वीजरूपा च वारुण्यां रक्षतु खेचरी ॥ अक्षः पातु महा
मुद्रा योगिनी योगसिद्धिनी ॥१२॥ एतास्त्वं के स्थिता दिव्या देवताः सर्वकामदाः चतुरश्रे त्रिरेखायां रक्षां कुर्वन्तु
सर्वदा ॥१३॥ श्रीः ॥ कामाकर्षणरूपा च बुद्ध्याकर्षणरूपिणी ॥ अहंकाराकर्षिणी च शब्दाकर्षणरूपिणी ॥१४॥
सर्वाकर्षणरूपा कर्षणरूपिणी ॥ मकर्षणरूपा च आत्माकर्षणरूपिणी ॥१५॥ अमृताकर्षिणी देवी शरीरा
कर्षिणी परा ॥ एतास्त्वं के स्थिता नित्याः सरोजाः षोडशे दले ॥१६॥ सर्वाभीष्टप्रदा देव्या रक्षां कुर्वन्तु सर्वदा ॥
श्रीः ॥ अनंगकुसुमा पूर्वे दक्षिणेऽनंगमेखला ॥१७॥ पश्चिमेऽनंगमदना उत्तरे मदनातुरा ॥ अनंगरेखा वाग्नेय्यां नैर्ऋ
त्यानंगवेगिनी ॥१८॥ अनंगांकुशा वायव्ये ईशे चानंगमालिना ॥ कवर्गाद्यष्टवर्गस्था अष्टौ वानंगशक्तयः ॥
॥१९॥ रक्षां कुर्वन्तु ताः सर्वा देवी वाष्टदले स्थिताः ॥२०॥ श्रीः ॥ ॥ सर्वसंक्षोभिणी शक्तिः सर्वविद्राविणी त

© Dharmartha Trust J&K. Digitized by eGangotri

स्तवरा ८

याःसर्वाकर्षणशक्तिश्चसर्वाह्लादनकारिणी १२१ सर्वसंमोहिनीशक्तिःसर्वस्तंभनरूपिणी।सर्वजृंभण
शक्तिश्चसर्वतोवशकारिणी १२२ सर्वरंजनशक्तिश्चसर्वोन्मादनकारिणी।सर्वार्थसाधनीशक्तिःसर्वसंप
त्स्वरूपिणी १२३ सर्वमंत्रमयीशक्तिःसर्वद्वंद्वक्षयंकरी।चतुर्दशारचक्रस्थाःक्षोभंकुर्वंतुसर्वदा १२४ श्रीः॥स
र्वसिद्धिमयीदेवीसर्वसंपत्प्रदायिनी।सर्वप्रियंकरीदेवीसर्वमंगलकारिणी १२५ सर्वकामप्रदादेवीसर्वदुःख
विमोचिनी।सर्वमृत्युप्रशमनीसर्वविघ्ननिवारिणी १२६ सर्वांगसुंदरीदेवीसर्वसौभाग्यदायिनी।यदिमाता
निचोक्ताश्चेमाश्चवांकुशादिकाः १२७ कादिन्यांतानिचोक्तार्यदेवतादशसंस्मृताः।बाह्यदशारचक्रस्थाः
क्षोभंकुर्वंतुसर्वदा १२८ श्रीः॥सर्वज्ञासर्वसिद्धिश्चसर्वैश्वर्यफलप्रदा।सर्वज्ञानमयीदेवीसर्वव्याधिविनाशिनी
१२९ सर्वाधारस्वरूपीचसर्वपापहरातथा।सर्वानंदमयीदेवीसर्वरक्षास्वरूपिणी १३० तथैवचमहेशानिस

राम ८

© Dharmartha Trust J&K. Digitized by eGangotri

वांछितफलप्रदायादिक्स्थाता निवोद्धार्यदेवता दशका स्मृताः १३१ अंतर्दशारचक्रस्था रक्षां कुर्वन्तु सर्वदा ॥ श्रीः
॥ वाग्देवी वशिनी या पातु पातु कामेश्वरी च माम् १३२ मोहिनी विमला पातु अरुणा जयनी च माम् । सर्वेश्वरी च मां
रक्षां करोतु कौलिनी तथा १३३ आद्यवर्गः समुद्धार्य वाग्देव्याष्टकसंस्मृताः । अष्टकोणांतरे देव्याः रक्षां कुर्वन्तु
सर्वदा १३४ श्रीः ॥ श्री सपाशांकुशा स्वायं नित्यं वो युध देवताः । देव्याश्च चक्रमध्यस्थाः रक्षां कुर्वन्तु सर्वदा १३५
धुंगगुवती पातु स्वांगस्थानंगरूपिणी । महादेव्याश्चक्रस्थाः रक्षां कुर्वन्तु सर्वदा १३६ श्रीमत्त्रिकोणमध्ये तु त
त्रिकोणात्रणांतरो । तन्मध्ये तु गुणाः पांतु वतस्नः पाठदेवता १३७ कामेकामेश्वरी पातु शर्वीचक्रेश्वरी तथा । जा
लंधरे महापीठे पातु मां भगमालिनी १३८ सूर्येन्दुवह्निपाठेन तु बिंदुचक्रनिवासिनी । ब्रह्मस्वरूपिणी पातु श्री
मत्त्रिपुरसुंदरी श्रीः १३९ सचित्रयोप जे देवि नवावरणपूजनम् । बिंदुचक्रे सदा नित्या महात्रिपुरसुंदरी १४०

© Dharmartha Trust J&K. Digitized by eGangotri

स्तव॰ ८ त्रैलोक्यमोहनेचक्रेचतुरस्रेप्रशोभिते।पातुमामनिशंदेवीत्रिपुरापरमेश्वरी १४१ सर्वाशापूरकेचक्रेषोड
शारेमनोहरे।तत्रचक्रेश्वरीनित्यापातुमांत्रिपुरेशिनी १४२ तथाष्टदलचक्रेतुसर्वसंक्षोभकारके।तत्रचक्रेश्व
४ रीनित्यापायात्त्रिपुरसुन्दरी १४३ चतुर्दशारचक्रेतुसौभाग्यदायकेपरे।तत्रचक्रेश्वरीनित्यापायात्त्रिपुरवासिनी
१४४ बाह्यदशारचक्रेतुसर्वार्थसाधकेपरे।त्रिपुरापातुममकल्याणहेतवे १४५ अंतर्दशारचक्रेतुसर्वर
क्षाकरेपरे।नित्यंचक्रेश्वरीदेवीपायात्त्रिपुरमालिनी १४६ तथाष्टकोणकेचक्रेसर्वरोगहरेपरे।पातुमांत्रिपु
रासिद्धादेवीचक्रेश्वरीतथा १४७ श्रीमत्त्रिकोणचक्रेतुसर्वसिद्धिप्रदायके।चक्रेश्वरीचमेरक्षांकरोतुत्रिपुरां
बिका १४८ बिंदुचक्रेश्वरीनित्यासर्वानंदमयेतथा।तत्रचक्रेश्वरीनित्यामहात्रिपुरसुन्दरी १४९ नित्या राम
कामेश्वरीपातुपातुमांभगमालिनी॥क्लिन्नामांसर्वदापातुभेरुंडापातुसर्वदा १५० मांवह्निवासिनीपातु ८

© Dharmartha Trust J&K. Digitized by eGangotri

महाविद्येश्वरीतथा। पातुमांशिवदूतीचत्वरितारक्षतुसदा १५१ कुलसुंदरीचमांपातुनित्याचपातुमामूनि
लापताकिनीनित्याविजयापातुसर्वदा १५२ श्रीसर्वमंगलापातुनित्याज्वालांशुमालिनी। विचित्रासर्व
दापातुषोडशीपातुसुंदरी १५३ महाविद्यात्रुटीयाचपातुमांबहुरूपिणी। महासप्तदशीनित्यानित्यमा
नन्दकारिणी १५४ पूर्वदक्षिणपश्चाद्वउत्तरोर्द्धरत्तुनगाः। पातुमांसर्वसिद्धिस्थानित्यमाम्नायदेवताः १५५ वा
वीकसोरशाकेपशैवगाणेशवैष्णवाः। सृष्टिस्थितिलयानामाख्यामानोरक्षंतुसर्वदा १५६ चतुरश्रेमहाचक्रे
योगिन्यःपांतुसर्वदा। डाकिनीराकिनीपातुलाकिनीकाकिनीतथा। १५७ साकिनीहाकिनीपातुयाकिनी
पातुसर्वदा। इतिमांसर्वदापातुचक्रस्थायोनीगणाः १५८ वर्णस्थामातृकाःसर्वारक्षांकुर्वंतुसर्वदा। चतुरश्रे
महाचक्रेबटुकोमांपरिरक्षतु १५९ पातुमाममनिशंदेविषोडशारेप्रजापतिः। तथाष्टदलचक्रेतुशिवोमांपरिरक्षतु

© Dharmartha Trust J&K. Digitized by eGangotri

स्तवरा॰ ९ १६० चतुर्दशारचक्रेतुभास्करोऽरुणोत्तमः।द्विदशारेसदापातुप्रभुनीलघणोहरिः १६१ चक्रारेमध्यचक्रेतुमांपर
मेश्वरी॥नवचक्रेश्वरीनित्यायानित्यापरमापरा १६२ पातुमामनिशंदेविमहात्रिपुरसुंदरी।महात्रिपुरसंकेद
र्पाश्चिंतनीपावपापरा १६३ ब्रह्मस्वरूपिणीपातुपंचमीपरदेवता।पंचपंचतथापंचपत्किंचित्पंचमंशुभम्
१६४ नित्यंपंचगुणैःपातुपंचमीपरदेवता।पंचमीपातुमांततेनित्यंरक्षतुपंचमी १६५ शांतिंकरोतुमांनित्यंपं
चमीपरदेवता।ईशानंसर्वदापातुनित्यंनिर्म्मील्यवासिनी १६६ शांभिकासुंदरीपातुबिंदुचक्रनिवासि
नी।ब्रह्मस्वरूपिणीपातुश्रीमत्त्रिपुरसुंदरी १६७ विद्यालक्ष्मीमहालक्ष्मीस्त्रिशक्तिःसाम्राज्यलक्ष्मीःपं
चलक्ष्मीरिदंपातुपंचकापरमेश्वरी १६८ श्रीविद्याचपरंज्योतिःपरानिष्कलशांभवी।अजपामातृकाश्चैवपंच राम ९
कोशाःप्रकीर्तिताः १६९ श्रीविद्यामृतपाठेशीमधुश्रीमन्नेश्वरी।अन्नपूर्णेतिविख्यातापंचकामदुघाःस्मृ

9

© Dharmartha Trust J&K. Digitized by eGangotri

ताः १७० आविद्यामृतपीठेशी क्षमाश्री रमणेश्वरी । अन्नपूर्णेति विद्यानां पंचकामडुघाः स्मृताः १७१ श्रीविद्या
सिद्धविद्या वमातंगी भुवनेश्वरी । वाराही चैव विद्यानां पंचरत्नाः प्रकीर्तिताः १७२ नित्यं कामकला पातु ह्
ह्रां मां पातु स्तुह्रां मां पातु खेचरी । शक्तिर्मा सर्वदा पातु या मूलाधारवासिनी १७३ श्रीः ॥ इदं त्रिपुरसुंदर्याः स्तो
त्रं वस्तुपदम् । पूजाक्रमेण कथितं साधकानां सुखावहम् १७४ क्रमेणानेन विधिना श्रीमत्त्रिपुरसुंदरीम् । सं
पूज्य साधकश्रेष्ठः स्तोत्रमेतत्समाजपेत् १७५ प्रातःकाले स्तुविर्भूत्वा निशायामर्द्धरात्रके । अथवा संकटे प्राप्ते रा
जस्थाने वडुर्गमे १७६ जले वा वानले वापि स्मशाने दुर्गमे गिरौ । यत्र यत्र भयं प्राप्ते सर्वे त्रैव पठेन्नरः । १७७ सर्वाव
यव भावेन देवीमं चिंत्य साधकः । श्लोकैः पठनेन सर्वपापविनाशिनी १७८ स्तोत्रं वाद्भुतमेवेदं त्रैलोक्यस्या
तिदुर्लभम् । गोपनीयं प्रयत्नेन यदिच्छेदात्मनो हितम् १७९ यस्मै कस्मै न दातव्यं दातव्यं नकदाचन

© Dharmartha Trust J&K. Digitized by eGangotri

स्तव॰ ।पवित्राणां वनदानत्वं दानत्वानववं खुभिः १२० नरघाःसुहृद्देव्या त्रेनदध्याह्रुश्च निंदकैः ।शिष्याय भक्तियुक्ताय सा
१० धकाय प्रकाशयेत् १२१ पितृमातृवभक्ताय गुरुभक्ताय दापयेत् ।श्रश्रुतिविश्वश्र भक्तिश्च गुरुदैवपरा सुत्वे
२२ भ्रष्टेभ्यः साधकेभ्योपि बांधवेभ्यो न दर्शयेत् ।दत्ते तु सिद्धिहानिः स्यादित्याज्ञा शंभुनाथुरा १२३ मंत्राऽपराश्र
लोपांतिक्रुद्धा भवति सुंदरी ।अस्तु मंत्रं भवेत्तस्य यत्नेन परिगोपयेत् १२४ यद्गृहे विद्यते ग्रंथा लिखित्वा स्तोत्र
मुत्तमम् ।चंचलापि स्थिरा भूत्वा कमला तत्र तिष्ठति १२५ तस्माद्यत्नादिमं ग्रंथं पूजयेद्गंधपुष्पकैः ।पूजाफलं
लभेन्नित्यं सान्निध्यं सुंदरी भवेत् १२६ स्तवराजमिदं पुण्यं यः पठेत्तु समाहितः ॥ यत्फलं लभते तस्माच्छृणु एवं तः
साधकस्ततः १२७ वारमेकं तु पाठफलं प्राप्नोति पूजनात् ।वामेकरे निवध्नीयात् प्राप्नोति पूजनं फलम् १२८ वि राम
धितो मातृचक्रे तु साधको भुवि जायते ।मासमेकं क्रमेणैव पठेद्भक्तिपरायणः १२९ स्वर्गविविधितो भूत्वा दे १०

© Dharmartha Trust J&K. Digitized by eGangotri

वीपुत्रेत्नभूतले।भक्त्यासंपूजयेद्देवींस्वदक्रूःसर्वदाजपेत १९० पूर्वजातिस्मरत्तानंवेत्तिजन्मसहस्रकम्।नपु
नर्जायतेयोनोमरणंनभविष्यति १९१ गंधर्वरूपवान्भूत्वासंपज्यपरमेश्वरीम्।एक्तामंत्रंपठित्वातुदेवत्वंलभ
तेध्रुवम् १९२ अपुत्रोलभतेपुत्रान्दरिद्रोलभतेधनम्।असाध्यंसाधयेत्सर्वंदुर्लभंसुलभंप्रिये १९३ अतिदुःखा
लयेघोरेभीमेनिगलबंधने।तत्रयत्नुपठेद्यस्मात्ध्रुवंमुच्येतबंधनात् १९४ यत्रयत्रस्थितोवापिस्तुतिर्भूत्वास्तुवि
स्तृयाद्देव्याःस्तोत्रंपठित्वातुमहास्तोत्रंपठेन्नरः १९५ अत्यंतरोगयुक्तोवायादर्देवीप्रपूजयेत्।सर्वंवाश्लोकमे
कंवाश्लोकार्द्धपादमेववा १९६ यःपठेत्सयतोभक्त्यासर्वसिद्धिमुपलभेत्।भक्त्यावधारयेद्यस्तुलिखित्वास्तो
त्रमुत्तमम् १९७ शिरोवाथवाकंठेकरेवावामदक्षिणे।समवेत्साधकश्रेष्ठोमाहात्म्यंभवेत्प्रिये १९८ लभतेस
र्वकामांश्चपरंस्वस्त्ययनंमहत्।तस्मादिदंविधानेनधारयेद्बुद्धिमान्सदा १९९ पठित्वापूजयित्वापित्रैलोक्यंव

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यानयोगात्मिका पूर्णा यतोऽस्मिन्मंत्रराजकं परम् २० श्रुत्वा स्तवमिमं श्रेष्ठं सर्वकामं ततो भवेत् । पापं पला

यितकामानि भुक्तिमुक्तिकराणि च २१ लभते नात्र संदेहो मुक्तिः स्वर्गरसातले । इष्टात्तु साधकश्रेष्ठः

सिंहकाः २२ दृष्ट्वा विलीयंते त्वायंते दशो दिशम् । विघ्नानि घोराणि पातिपातिपापानि संक्षयम् २३ दे

व दानवो भूत्वा भुनक्ति बहुलं भुवि । तस्मान्नित्यं पठेच्छ्रीमान्मुक्तिकामार्थसिद्धये २४ इदं त्रिपुरसुंदर्याः स्त

वराजं मनोहरम् । रक्षामंत्रं परमं देशिवेन परिकीर्तितम् २५ तस्मै शंभुना प्रोक्तं मातार्थे लोके भाषितम् २६

श्रीः इति श्रीरुद्रयामले समपादलग्नग्रंथविस्तारे पंचमी स्तवराजस्तोत्रं संपूर्णम् श्रीमहात्रिपुरसुंदर्यै

नमः ॥ शुभमस्तु

११

© Dharmartha Trust J&K. Digitized by eGangotri